Draft Release Version

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# चतुर्थ काण्डे – तृतीयः प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 0.0 dated Oct 12, 2018.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 31, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

1st Version Number 0.0 dated October 12, 2018

# Table of Contents

4. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः .................................... 4

4.3 चतुर्थ काण्डे तृतीयः प्रश्नः – चितिवर्णनं .................................. 4

====================

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

# 4. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 4.3 चतुर्थ काण्डे तृतीयः प्रश्नः – चितिवर्णनं

**T.S.4.3.1.1 - Kramam**

अपाम् त्वा । त्वेमन्न् । एमन्थ् सादयामि । सादयाम्यपाम् । अपाम् त्वा । त्वोद्मन्न् । ओद्मन्थ् सादयामि । सादयाम्यपाम् । अपाम् त्वा । त्वा भस्मन्न् । भस्मन्थ् सादयामि । सादयाम्यपाम् । अपाम् त्वा । त्वा ज्योतिषि । ज्योतिषि सादयामि । सादयाम्यपाम् । अपाम् त्वा । त्वाऽयने । अयने सादयामि । सादयाम्यर्णवे । अर्णवे सदने । सदने सीद । सीद समुद्रे । समुद्रे सदने । सदने सीद । सीद सलिले । सलिले सदने । सदने सीद । सीदापाम् । अपाम् क्षये । क्षये सीद । सीदापाम् । अपा॑ँ सधिषि । सधिषि सीद । सीदापाम् । अपाम् त्वा । त्वा सदने । सदने सादयामि । सादयाम्यपाम् । अपाम् त्वा । त्वा सधस्थे । सधस्थे सादयामि । सधस्थ इति सध – स्थे । सादयाम्यपाम् । अपाम् त्वा । त्वा पुरीषे । पुरीषे सादयामि ।

सादयाम्यपाम् । अपाम् त्वा । त्वा योनौ ( ) । योनौ सादयामि ।

सादयाम्यपाम् । अपाम् त्वा । त्वा पाथसि । पाथसि सादयामि ।

सादयामि गायत्री । गायत्री छन्दः । छन्दस्त्रिष्टुप् । त्रिष्टुप् छन्दः ।

छन्दो जगती । जगती छन्दः । छन्दोऽनुष्टुप् । अनुष्टुप् छन्दः ।

अनुष्टुबित्यनु – स्तुप् । छन्दः पङ्क्तिः । पङ्क्ति श्छन्दः ।

छन्द इति छन्दः ॥ **1** (**65/67**)

*(योनौ – पञ्चदश च) (A1)*

**T.S.4.3.2.1 - Kramam**

अयम् पुरः । पुरो भुवः । भुवस्तस्य । तस्य प्राणः । प्राणो

भौवायनः । प्राण इति प्र – अनः । भौवायनो वसन्तः । वसन्तः

प्राणायनः । प्राणायनो गायत्री । गायत्री वासन्ती । वासन्ती गायत्रियै ।

गायत्रियै गायत्रम् । गायत्रम् गायत्रात् । गायत्रादुपाꣳशुः ।

उपाꣳशुरुपाꣳशोः । उपाꣳशुरित्युप – अꣳशुः । उपाꣳशोस्त्रिवृत् ।

उपाꣳशोरित्युप – अꣳशोः । त्रिवृत् त्रिवृतः । त्रिवृदिति त्रि – वृत् ।

त्रिवृतो रथन्तरम् । त्रिवृत इति त्रि – वृतः । रथन्तरꣳ रथन्तरात् ।

रथन्तरमिति रथम् – तरम् । रथन्तराद् वसिष्ठः ।

रथन्तरादिति रथम् - तरात् । वसिष्ठ ऋषिः । ऋषिः प्रजापतिगृहीतया ।
प्रजापतिगृहीतया त्वया । प्रजापतिगृहीतयेति प्रजापति - गृहीतया ।
त्वया प्राणम् । प्राणम् गृह्णामि । प्राणमिति प्र - अनम् ।
गृह्णामि प्रजाभ्यः । प्रजाभ्योऽयम् । प्रजाभ्य इति प्र - जाभ्यः ।
अयम् दक्षिणा । दक्षिणा विश्वकर्मा । विश्वकर्मा तस्य । विश्वकर्मेति
विश्व-कर्मा । तस्य मनः । मनो वैश्वकर्मणम् । वैश्वकर्मणम् ग्रीष्मः ।
वैश्वकर्मणमिति वैश्व - कर्मणम् । ग्रीष्मो मानसः । मानसस्त्रिष्टुक् ।
त्रिष्टुग् ग्रैष्मी । ग्रैष्मी त्रिष्टुभः । त्रिष्टुभ ऐडम् । ऐडमैडात् ।
ऐडादन्तर्यामः । अन्तर्यामोऽन्तर्यामात् । अन्तर्याम इत्यन्तः - यामः ।
अन्तर्यामात् पञ्चदशः । अन्तर्यामादित्यन्तः - यामात् । पञ्चदशः
पञ्चदशात् । पञ्चदश इति पञ्च - दशः । पञ्चदशाद् बृहत् ।
पञ्चदशादिति पञ्च - दशात् । बृहद् बृहतः । बृहतो भरद्वाजः ।
भरद्वाज ऋषिः । ऋषिः प्रजापतिगृहीतया । प्रजापतिगृहीतया त्वया ।
प्रजापतिगृहीतयेति प्रजापति - गृहीतया । त्वया मनः ।
मनो गृह्णामि । **2 (50/67)**

**T.S.4.3.2.2 - Kramam**

गृह्णामि प्रजाभ्यः । प्रजाभ्योऽयम् । प्रजाभ्य इति प्र – जाभ्यः ।
अयम् पश्चात् । पश्चाद् विश्वव्यचाः । विश्वव्यचास्तस्य । विश्वव्यचा
इति विश्व – व्यचाः । तस्य चक्षुः । चक्षुर् वैश्वव्यचसम् ।
वैश्वव्यचसम् ँवर्.षाणि । वैश्वव्यचसमिति वैश्व – व्यचसम् ।
वर्.षाणि चाक्षुषाणि । चाक्षुषाणि जगती । जगती वार्.षी । वार्.षी
जगत्याः । जगत्या ऋक्षमम् । ऋक्षममृक्षमात् । ऋक्षमाच्छुक्रः ।
शुक्रः शुक्रात् । शुक्राथ् सप्तदशः । सप्तदशः सप्तदशात् ।
सप्तदश इति सप्त – दशः । सप्तदशाद् वैरूपम् । सप्तदशादिति
सप्त – दशात् । वैरूपं ँवैरूपात् । वैरूपाद् विश्वामित्रः । विश्वामित्र
ऋषिः । विश्वामित्र इति विश्व – मित्रः । ऋषिः प्रजापतिगृहीतया ।
प्रजापतिगृहीतया त्वया । प्रजापतिगृहीतयेति प्रजापति – गृहीतया ।
त्वया चक्षुः । चक्षुर् गृह्णामि । गृह्णामि प्रजाभ्यः । प्रजाभ्य इदम् ।
प्रजाभ्य इति प्र – जाभ्यः । इदमुत्तरात् । उत्तराथ् सुवः ।
उत्तरादित्युत् – तरात् । सुवस्तस्य । तस्य श्रोत्रम् । श्रोत्रꣳ सौवम् ।

सौव॒ꣳ श॒रत् । श॒रच्छ्रौ॒त्री । श्रौ॒त्र्य॑नु॒ष्टुप् । अ॒नु॒ष्टुप्छा॑र॒दी ।

अ॒नु॒ष्टु॑बित्यनु – स्तुप् । शा॒र॒द्य॑नु॒ष्टुभः॑ । अ॒नु॒ष्टुभः॑ स्वा॒रम् । अ॒नु॒ष्टु॒भ

इत्य॑नु–स्तु॑भः । स्वा॒र७ स्वा॒रात् । स्वा॒रान् म॒न्थी । म॒न्थी म॒न्थिनः॑ ।

म॒न्थि॑न एक॒वि॒ꣳ॒शः । ए॒क॒वि॒ꣳ॒श॑ ए॒क॒वि॒ꣳ॒शात् ।

ए॒क॒वि॒ꣳ॒श इत्ये॑क – वि॒ꣳ॒शः । ए॒क॒वि॒ꣳ॒शाद् वै॑रा॒जम् ।

ए॒क॒वि॒ꣳ॒शादित्ये॑क – वि॒ꣳ॒शात् । वै॒रा॒जं ँवै॑रा॒जात् ।

वै॒रा॒जाज् ज॒मद॑ग्निः । ज॒मद॑ग्नि॒र्. ऋषिः॑ ।

ऋषिः॑ प्र॒जाप॑तिगृहीतया ( ) । प्र॒जाप॑तिगृहीतया॒ त्वया᳚ ।

प्र॒जाप॑तिगृहीत॒येति॑ प्र॒जाप॑ति – गृ॒ही॒त॒या । **3 (50/64)**

**<u>T.S.4.3.2.3 - Kramam</u>**

त्वया॒ श्रोत्र᳚म् । श्रोत्र॑म् गृह्णामि । गृ॒ह्णा॒मि॒ प्र॒जाभ्यः॑ । प्र॒जाभ्य॑ इ॒यम् ।

प्र॒जाभ्य॒ इति॑ प्र – जाभ्यः॑ । इ॒यमु॒परि॑ । उ॒परि॑ म॒तिः । म॒तिस्तस्यै᳚ ।

तस्यै॒ वाक् । वाङ् मा॒ती । मा॒ती हे॑म॒न्तः । हे॒म॒न्तो वा᳚च्याय॒नः ।

वा॒च्या॒य॒नः प॒ङ्क्तिः । प॒ङ्क्तिर्. है॑म॒न्ती । है॒म॒न्ती प॒ङ्क्त्यै । प॒ङ्क्त्यै

नि॒धन॑वत् । नि॒धन॑वन् नि॒धन॑वतः । नि॒धन॑व॒दिति॑ नि॒धन॑ – व॒त् ।

निधनवत आग्रयणः । निधनवत इति निधन – वतः । आग्रयण

आग्रयणात् । आग्रयणात् त्रिणवत्रयस्त्रि॒ꣳशौ । त्रिणवत्रयस्त्रि॒ꣳशौ

त्रिणवत्रयस्त्रि॒ꣳशाभ्याम् । त्रिणवत्रयस्त्रि॒ꣳशाविति

त्रिणव – त्रयस्त्रि॒ꣳशौ । त्रिणवत्रयस्त्रि॒ꣳशाभ्याꣳ शाक्वररैवते ।

त्रिणवत्रयस्त्रि॒ꣳशाभ्यामिति त्रिणव – त्रयस्त्रि॒ꣳशाभ्याम् ।

शाक्वररैवते शाक्वररैवताभ्याम् । शाक्वररैवते इति शाक्वर–रैवते ।

शाक्वररैवताभ्यां ँविश्वकर्मा । शाक्वररैवताभ्यामिति

शाक्वर – रैवताभ्याम् । विश्वकर्म ऋषिः । विश्वकर्मेति विश्व–कर्मा ।

ऋषिः प्रजापतिगृहीतया । प्रजापतिगृहीतया त्वया ।

प्रजापतिगृहीतयेति प्रजापति – गृहीतया । त्वया वाचम् । वाचम्

गृह्णामि । गृह्णामि प्रजाभ्यः । प्रजाभ्य इति प्र – जाभ्यः ॥ **4** (**30/39**)

*(त्वया मनो–जमदग्निर्.ऋषिः प्रजापतिगृहीतया–त्रि॒ꣳशच्च) (A2)*

**T.S.4.3.3.1 - Kramam**

प्राची दिशाम् । दिशां ँवसन्तः । वसन्त ऋतूनाम् । ऋतूनामग्निः ।

अग्निर् देवता । देवता ब्रह्म । ब्रह्म द्रविणम् । द्रविणम् त्रिवृत् ।

त्रिवृथ् स्तोमः । त्रिवृदिति त्रि – वृत् । स्तोमः सः । स उ ।

उ पञ्चदशवर्तनिः । पञ्चदशवर्तनि स्त्र्यविः । पञ्चदशवर्तनिरिति पञ्चदश - वर्तनिः । त्र्यविर् वयः । त्र्यविरिति त्रि - अविः । वयः कृतम् । कृतमयानाम् । अयानाम् पुरोवातः । पुरोवातो वातः । पुरोवात इति पुरः - वातः । वातः सानगः । सानग ऋषिः । ऋषिर् दक्षिणा । दक्षिणा दिशाम् । दिशाम् ग्रीष्मः । ग्रीष्म ऋतूनाम् । ऋतूनामिन्द्रः । इन्द्रो देवता । देवता क्षत्रम् । क्षत्रम् द्रविणम् । द्रविणम् पञ्चदशः । पञ्चदशः स्तोमः । पञ्चदश इति पञ्च - दशः । स्तोमः सः । स उ । उ सप्तदशवर्तनिः । सप्तदशवर्तनिर् दित्यवाट् । सप्तदशवर्तनिरिति सप्तदश-वर्तनिः । दित्यवाड् वयः । दित्यवाडिति दित्य - वाट् । वयस्त्रेता । त्रेताऽयानाम् । अयानाम् दक्षिणाद्वातः । दक्षिणाद्वातो वातः । दक्षिणाद्वात इति दक्षिणात् - वातः । वातः सनातनः । सनातन ऋषिः । सनातन इति सना - तनः । ऋषिः प्रतीची । प्रतीची दिशाम् । दिशां ँवर्.षाः । वर्.षा ऋतूनाम् । ऋतूनां ँविश्वे । विश्वे देवाः । देवा देवता । देवता विट् । विड् द्रविणम् । **5** (**50/59**)

**T.S.4.3.3.2 - Kramam**

द्रविण॒ꣳ सप्तद॒शः । स॒प्त॒द॒शः स्तोमः॑ । स॒प्त॒द॒श इति॑

सप्त – द॒शः । स्तोम॒स्सः । स उ॑ । उ॒वे॒क॒वि॒ꣳ॒श॑वर्तनिः ।

ए॒क॒वि॒ꣳ॒शव॑र्तनि स्त्रिव॒थ्सः । ए॒क॒वि॒ꣳ॒शव॑र्तनि॒रित्ये॑कवि॒ꣳ॒श–व॒र्त॒निः ।

त्रि॒व॒थ्सो वयः॑ । त्रि॒व॒थ्स इति॑ त्रि – व॒थ्सः । वयो॑ द्वाप॒रः ।

द्वा॒प॒रो॑ऽयानाम् । अया॑नाम् पश्चाद्वा॒तः । प॒श्चा॒द्वा॒तो वातः॑ । प॒श्चा॒द्वा॒त

इति॑ पश्चात् – वा॒तः । वातो॑ऽह॒भूनः॑ । अ॒ह॒भू॒न ऋषिः॑ । ऋषि॑रु॒दीची ।

उदी॑ची दि॒शाम् । दि॒शाꣳ श॒रत् । श॒रदृ॒तू॒नाम् । ऋ॒तू॒नाम् मि॒त्रावरु॑णौ ।

मि॒त्रावरु॑णौ दे॒वता᳚ । मि॒त्रावरु॑णा॒विति॑ मि॒त्रा – वरु॑णौ । दे॒वता पु॒ष्टम् ।

पु॒ष्टम् द्रवि॑णम् । द्रवि॑णमेकवि॒ꣳ॒शः । ए॒क॒वि॒ꣳ॒शः स्तोमः॑ । ए॒क॒वि॒ꣳ॒श

इत्ये॑क – वि॒ꣳ॒शः । स्तोम॒स्सः । स उ॑ । उ॒ त्रि॒णव॑वर्तनिः ।

त्रि॒णव॑वर्तनि स्तु॒र्य॑वाट् । त्रि॒णव॑वर्तनि॒रिति॑ त्रि॒णव – व॒र्त॒निः । तु॒र्य॒वाड्

वयः॑ । तु॒र्य॒वा॑डिति॑ तुर्य–वाट् । वय॑ आस्क॒न्दः । आ॒स्क॒न्दो᳚ऽयानाम् ।

आ॒स्क॒न्द इत्या᳚ – स्क॒न्दः । अया॑नामु॒त्तराद्वा॒तः । उ॒त्त॒रा॒द्वा॒तो वातः॑ ।

उ॒त्त॒रा॒द्वा॒त इत्यु॑त्तरात् – वा॒तः । वातः॑ प्र॒त्नः । प्र॒त्न ऋषिः॑ ।

ऋषिरूर्द्ध्वा । ऊर्द्ध्वा दिशाम् । दिशाꣳ हेमन्तशिशिरौ ।

हेमन्तशिशिरावृतूनाम् । हेमन्तशिशिराविति हेमन्त – शिशिरौ ।

ऋतूनाम् बृहस्पतिः । बृहस्पतिर् देवता । देवता वर्चः ।

वर्चो द्रविणम् । द्रविणम् त्रिणवः । त्रिणवः स्तोमः । त्रिणव इति

त्रि – नवः । स्तोमः सः । स उ । उ त्रयस्त्रिꣳशवर्तनिः ।

त्रयस्त्रिꣳशवर्तनिः पष्ठवात् । त्रयस्त्रिꣳशवर्तनिरिति

त्रयस्त्रिꣳश – वर्तनिः । पष्ठवाद् वयः ( ) । पष्ठवादिति पष्ठ – वात् ।

वयोऽभिभूः । अभिभूरयानाम् । अभिभूरित्यभि – भूः । अयानाम्

ँविष्वग्वातः । विष्वग्वातो वातः । विष्वग्वात इति विष्वक् – वातः ।

वातः सुपर्णः । सुपर्ण ऋषिः । सुपर्ण इति सु–पर्णः । ऋषिः पितरः ।

पितरः पितामहाः । पितामहाः परे । परेऽवरे । अवरे ते । ते नः ।

नः पान्तु । पान्तु ते । ते नः । नोऽवन्तु । अवन्त्वस्मिन्न् । अस्मिन्

ब्रह्मन्न् । ब्रह्मन्नस्मिन्न् । अस्मिन् क्षत्रे । क्षत्रेऽस्याम् । अस्यामाशिषि ।

आशिष्यस्याम् । आशिषीत्या – शिषि । अस्याम् पुरोधायाम् ।

पुरोधायामस्मिन्न् । पुरोधायामिति पुरः – धायाम् । अस्मिन् कर्मन्न् ।

कर्मन्नस्याम् । अस्याम् देवहूत्याम् ।

देवहूत्यामिति देव – हूत्याम् ॥ 6 (78/97)

*(विट् – पष्ठवाद् वयो – ऽष्टाविꣳशतिश्च) (A3)*

**T.S.4.3.4.1 - Kramam**

ध्रुवक्षितिर् ध्रुवयोनिः । ध्रुवक्षितिरिति ध्रुव – क्षितिः । ध्रुवयोनिर्

ध्रुवा । ध्रुवयोनिरिति ध्रुव – योनिः । ध्रुवाऽसि । असि ध्रुवाम् ।

ध्रुवां ँयोनिम् । योनिमा । आ सीद । सीद साद्ध्या । साद्ध्येति

साद्ध्या ॥ उक्षस्य केतुम् । केतुम् प्रथमम् । प्रथमम् पुरस्तात् ।

पुरस्तादश्विना । अश्विनाऽद्ध्वर्यू । अद्ध्वर्यू सादयताम् ।

अद्ध्वर्यू इत्यद्ध्वर्यू । सादयतामिह । इह त्वा । त्वेति त्वा ॥

स्वे दक्षे । दक्षे दक्षपिता । दक्षपितेह । दक्षपितेति दक्ष – पिता ।

इह सीद । सीद देवत्रा । देवत्रा पृथिवी । देवत्रेति देव – त्रा ।

पृथिवी बृहती । बृहती रराणा । रराणेति रराणा ॥ स्वासस्था तनुवा ।

स्वासस्थेति सु – आसस्था । तनुवा सम् । सं ँविशस्व ।

विशस्व पिता । पितेव । इवैधि । एधि सूनवे । सूनव आ ।

आ सुशेवा । सुशेवाऽश्विना । सुशेवेति सु – शेवा ।

अ॒श्विना᳚ऽद्ध्व॒र्यू । अ॒द्ध्व॒र्यू सा॑दयताम् । अ॒द्ध्व॒र्यू इत्य॑द्ध्व॒र्यू ।

सा॒द॒य॒ता॒मि॒ह । इ॒ह त्वा᳚ । त्वेति॑ त्वा ॥ कु॒ला॒यिनी॒ वसु॑मती ।

वसु॑मती वयो॒धाः । वसु॑म॒तीति॒ वसु॑ – म॒ती॒ । व॒यो॒धा र॒यिम् ।

व॒यो॒धा इति॑ वयः – धाः । र॒यिम् नः॑ । नो॒ व॒र्द्ध॒ । व॒र्द्ध॒ ब॒हु॒लम् ।

ब॒हु॒ल॒ꣳ सु॒वीर᳚म् । सु॒वी॒रमिति॑ सु – वीर᳚म् ॥ **7 (50/60)**

**T.S.4.3.4.2 - Kramam**

अपाम॑तिम् । अम॑तिम् दु॒र्म॒तिम् । दु॒र्म॒तिम् बाध॑माना । दु॒र्म॒तिमिति॑

दुः – म॒तिम् । बाध॑माना रा॒यः । रा॒यस्पोषे᳚ । पोषे॑ य॒ज्ञप॑तिम् ।

य॒ज्ञप॑तिमा॒भज॑न्ती । य॒ज्ञप॑ति॒मिति॑ य॒ज्ञ – प॒ति॒म् । आ॒भज॑न्ती॒ सुवः॑ ।

आ॒भ॒जन्तीत्या᳚ – भज॑न्ती । सुव॑र् धेहि । धे॒हि॒ यज॑मानाय ।

यज॑मनाय॒ पोष᳚म् । पोष॑म॒श्विना᳚ । अ॒श्विना᳚ऽद्ध्व॒र्यू । अ॒द्ध्व॒र्यू

सा॑दयताम् । अ॒द्ध्व॒र्यू इत्य॑द्ध्व॒र्यू । सा॒द॒य॒ता॒मि॒ह । इ॒ह त्वा᳚ । त्वेति॑

त्वा ॥ अ॒ग्नेः पुरी॑षम् । पुरी॑षमसि । अ॒सि॒ दे॒व॒यानी᳚ । दे॒व॒यानी॒ ताम् ।

दे॒व॒यानीति॑ देव – यानी᳚ । ताम् त्वा᳚ । त्वा॒ विश्वे᳚ । विश्वे॑ अ॒भि ।

अ॒भि गृ॑णन्तु । गृ॒ण॒न्तु॒ दे॒वाः । दे॒वा इति॑ दे॒वाः ॥

स्तोम॑पृष्ठा घृ॒तव॑ती । स्तोम॑पृ॒ष्ठेति॒ स्तोम॑ – पृ॒ष्ठा॒ । घृ॒तव॑ती॒ह ।

घृतवतीति घृत – वती । इह सीद । सीद प्रजावत् । प्रजावदस्मे ।
प्रजावदिति प्रजा – वत् । अस्मे द्रविणा । अस्मे इत्यस्मे । द्रविणा ।
आ यजस्व । यजस्वाश्विना । अश्विनाऽद्ध्वर्यू । अद्ध्वर्यू
सादयताम् । अद्ध्वर्यू इत्यद्ध्वर्यू । सादयतामिह । इह त्वा । त्वेति
त्वा ॥ दिवो मूर्द्धा । मूर्द्धाऽसि । असि पृथिव्याः । पृथिव्या नाभिः ।
नाभिर् विष्टम्भनी । विष्टम्भनी दिशाम् । विष्टम्भनीति वि – स्तम्भनी ।
दिशामधिपत्नी । अधिपत्नी भुवनानाम् । अधिपत्नीत्यधि – पत्नी ।
भुवनानामिति भुवनानाम् ॥ **8 (50/62)**

**<u>T.S.4.3.4.3 - Kramam</u>**

ऊर्मिर् द्रप्सः । द्रप्सो अपाम् । अपामसि । असि विश्वकर्मा ।
विश्वकर्मा ते । विश्वकर्मेति विश्व – कर्मा । त ऋषिः । ऋषिरश्विना ।
अश्विनाऽद्ध्वर्यू । अद्ध्वर्यू सादयताम् । अद्ध्वर्यू इत्यद्ध्वर्यू ।
सादयतामिह । इह त्वा । त्वेति त्वा ॥ सजूर्. ऋतुभिः । सजूरिति
स – जूः । ऋतुभिः सजूः । ऋतुभिरित्यृतु–भिः । सजूर् विधाभिः ।
सजूरिति स – जूः । विधाभिः सजूः । विधाभिरिति वि – धाभिः ।
सजूर् वसुभिः । सजूरिति स – जूः । वसुभिः सजूः ।

वसुभिरिति वसु – भिः । सजू रुद्रैः । सजूरिति स – जूः ।

रुद्रैः सजूः । सजूरादित्यैः । सजूरिति स – जूः । आदित्यैः सजूः ।

सजूर् विश्वैः । सजूरिति स – जूः । विश्वैर् देवैः । देवैः सजूः ।

सजूर् देवैः । सजूरिति स – जूः । देवैः सजूः । सजूर् देवैः ।

सजूरिति स – जूः । देवैर् वयोनाधैः । वयोनाधैरग्नये ।

वयोनाधैरिति वयः – नाधैः । अग्नये त्वा । त्वा वैश्वानराय ।

वैश्वानरायाश्विना । अश्विनाऽद्ध्वर्यू । अद्ध्वर्यू सादयताम् । अद्ध्वर्यू

इत्यद्ध्वर्यू । सादयतामिह । इह त्वा । त्वेति त्वा ॥ प्राणम् मे ।

प्राणमिति प्र – अनम् । मे पाहि । पाह्यपानम् । अपानम् मे ।

अपानमित्यप – अनम् । मे पाहि । पाहि व्यानम् । व्यानम् मे ।

व्यानमिति वि – अनम् । मे पाहि । पाहि चक्षुः । चक्षुर् मे ।

म उर्व्या ( ) । उर्व्या वि । वि भाहि । भाहि श्रोत्रम् । श्रोत्रम् मे ।

मे श्लोकय । श्लोकयापः । अपस्पिन्व । पिन्वौषधीः । ओषधीर्

जिन्व । जिन्व द्विपात् । द्विपात् पाहि । द्विपादिति द्वि – पात् ।

पाहि चतुष्पात् । चतुष्पादव । चतुष्पादिति चतुः - पात् ।
अव दिवः । दिवो वृष्टिम् । वृष्टिमा । एरय । ईरयेतीरय ॥ 9 (67/87)

*(सुवीरं - भुवनाना - मुर्व्या - सप्तदश च) (A4)*

**T.S.4.3.5.1 - Kramam**

त्र्यविर् वयः । त्र्यविरिति त्रि - अविः । वयस्त्रिष्टुप् । त्रिष्टुप् छन्दः ।
छन्दो दित्यवाट् । दित्यवाड् वयः । दित्यवाडिति दित्य - वाट् ।
वयो विराट् । विराट् छन्दः । विराडिति वि-राट् । छन्दः पञ्चाविः ।
पञ्चाविर् वयः । पञ्चाविरिति पञ्च - अविः । वयो गायत्री ।
गायत्री छन्दः । छन्दस्त्रिवथ्सः । त्रिवथ्सो वयः । त्रिवथ्स इति
त्रि - वथ्सः । वय उष्णिहा । उष्णिहा छन्दः । छन्दस्तुर्यवाट् ।
तुर्यवाड् वयः । तुर्यवाडिति तुर्य-वाट् । वयोऽनुष्टुप् । अनुष्टुप् छन्दः ।
अनुष्टुबित्यनु - स्तुप् । छन्दः पष्ठवात् । पष्ठवाद् वयः । पष्ठवादिति
पष्ठ - वात् । वयो बृहती । बृहती छन्दः । छन्द उक्षा । उक्षा वयः ।
वयः सतोबृहती । सतोबृहती छन्दः । सतोबृहतीति सतः - बृहती ।
छन्द ऋषभः । ऋषभो वयः । वयः ककुत् । ककुच्छन्दः ।
छन्दो धेनुः । धेनुर् वयः । वयो जगती । जगती छन्दः ।

छन्दोऽनड्वान् । अनड्वान्. वयः । वयः पङ्क्तिः । पङ्क्ति श्छन्दः ।
छन्दो बस्तः । बस्तो वयः । वयो विवलम् । विवलम् छन्दः ।
विवलमिति वि – वलम् । छन्दो वृष्णिः । वृष्णिर् वयः ।
वयो विशालम् । विशालम् छन्दः । विशालमिति वि – शालम् ।
छन्दः पुरुषः । पुरुषो वयः ( ) । वयस्तन्द्रम् । तन्द्रम् छन्दः ।
छन्दो व्याघ्रः । व्याघ्रो वयः । वयोऽनाधृष्टम् । अनाधृष्टम् छन्दः ।
अनाधृष्टमित्यना – धृष्टम् । छन्दः सिꣳहः । सिꣳहो वयः ।
वय श्छदिः । छदि श्छन्दः । छन्दो विष्टम्भः । विष्टम्भो वयः ।
विष्टम्भ इति वि – स्तम्भः । वयोऽधिपतिः । अधिपति श्छन्दः ।
अधिपतिरित्यधि – पतिः । छन्दः क्षत्रम् । क्षत्रम् ँवयः ।
वयो मयन्दम् । मयन्दम् छन्दः । छन्दो विश्वकर्मा । विश्वकर्मा वयः ।
विश्वकर्मेति विश्व – कर्मा । वयः परमेष्ठी । परमेष्ठी छन्दः ।
छन्दो मूर्द्धा । मूर्द्धा वयः । वयः प्रजापतिः । प्रजापति श्छन्दः ।
प्रजापतिरिति प्रजा – पतिः । छन्द इति छन्दः ॥ **10** (**76/92**)

*(पुरुषो वयः – षड् विꣳशतिश्च) (A5)*

**T.S.4.3.6.1 - Kramam**

इन्द्राग्नी अव्यथमानाम् । इन्द्राग्नी इतीन्द्र – अग्नी ।
अव्यथमानामिष्टकाम् । इष्टकाम् दृꣳहतम् । दृꣳहतं ँयुवम् । युवमिति
युवम् ॥ पृष्ठेन द्यावापृथिवी । द्यावापृथिवी अन्तरिक्षम् । द्यावापृथिवी
इति द्यावा – पृथिवी । अन्तरिक्षम् च । च वि । वि बाधताम् ।
बाधतामिति बाधताम् ॥ विश्वकर्मा त्वा । विश्वकर्मेति विश्व – कर्मा ।
त्वा सादयतु । सादयत्वन्तरिक्षस्य । अन्तरिक्षस्य पृष्ठे । पृष्ठे
व्यचस्वतीम् । व्यचस्वतीम् प्रथस्वतीम् । प्रथस्वतीम् भास्वतीम् ।
भास्वतीꣳ सूरिमतीम् । सूरिमतीमा । सूरिमतीमिति सूरि – मतीम् ।
आ या । या द्याम् । द्याम् भासि । भास्या । आ पृथिवीम् ।
पृथिवीमा । ओरु । उर्वन्तरिक्षम् । अन्तरिक्षमन्तरिक्षम् । अन्तरिक्षं
ँयच्छ । यच्छान्तरिक्षम् । अन्तरिक्षम् दृꣳह । दृꣳहान्तरिक्षम् ।
अन्तरिक्षम् मा । मा हिꣳसीः । हिꣳसीर् विश्वस्मै । विश्वस्मै प्राणाय ।
प्राणायापानाय । प्राणायेति प्र – अनाय । अपानाय व्यानाय ।
अपानायेत्यप – अनाय । व्यानायोदानाय । व्यानायेति वि – अनाय ।
उदानाय प्रतिष्ठायै । उदानायेत्युत् – अनाय । प्रतिष्ठायै चरित्राय ।

प्रतिष्ठाया इति प्रति - स्थायै । चरित्राय वायुः । वायुस्त्वा । त्वाऽभि ।

अभि पातु । पातु मह्या । मह्या स्वस्त्या । स्वस्त्या छर्दिषा ।

छर्दिषा शन्तमेन । **11** (**50/59**)

**T.S.4.3.6.2 - Kramam**

शन्तमेन तया । शन्तमेनेति शम् - तमेन । तया देवतया ।

देवतयाऽङ्गिरस्वत् । अङ्गिरस्वद् ध्रुवा । ध्रुवा सीद ।

सीदेति सीद ॥ राज्ञ्यसि । असि प्राची । प्राची दिक् । दिग् विराट् ।

विराडसि । विराडिति वि - राट् । असि दक्षिणा । दक्षिणा दिक् ।

दिख् सम्राट् । सम्राडसि । सम्राडिति सम् - राट् । असि प्रतीची ।

प्रतीची दिक् । दिख् स्वराट् । स्वराडसि । स्वराडिति स्व - राट् ।

अस्युदीची । उदीची दिक् । दिगधिपत्नी । अधिपत्न्यसि ।

अधिपत्नीत्यधि - पत्नी । असि बृहती । बृहती दिक् । दिगायुः ।

आयुर् मे । मे पाहि । पाहि प्राणम् । प्राणम् मे ।

प्राणमिति प्र - अनम् । मे पाहि । पाह्यपानम् । अपानम् मे ।

अपानमित्यप - अनम् । मे पाहि । पाहि व्यानम् । व्यानम् मे ।

व्यानमिति वि - अनम् । मे पाहि । पाहि चक्षुः । चक्षुर् मे ।
मे पाहि । पाहि श्रोत्रम् । श्रोत्रम् मे । मे पाहि । पाहि मनः ।
मनो मे । मे जिन्व । जिन्व वाचम् । वाचम् मे । मे पिन्व ( ) ।
पिन्वात्मानम् । आत्मानम् मे । मे पाहि । पाहि ज्योतिः ।
ज्योतिर् मे । मे यच्छ । यच्छेति यच्छ ॥ **12 (56/64)**

*(छर्दिषा - पिन्व - षट्च) (A6)*

**T.S.4.3.7.1 - Kramam**

मा छन्दः । छन्दः प्रमा । प्रमा छन्दः । प्रमेति प्र - मा ।
छन्दः प्रतिमा । प्रतिमा छन्दः । प्रतिमेति प्रति–मा । छन्दोऽस्रीविः ।
अस्रीवि श्छन्दः । छन्दः पङ्क्तिः । पङ्क्ति श्छन्दः । छन्द उष्णिहा ।
उष्णिहा छन्दः । छन्दो बृहती । बृहती छन्दः । छन्दोऽनुष्टुप् । अनुष्टुप्
छन्दः । अनुष्टुबित्यनु - स्तुप् । छन्दो विराट् । विराट् छन्दः ।
विराडिति वि - राट् । छन्दो गायत्री । गायत्री छन्दः । छन्दस्त्रिष्टुप् ।
त्रिष्टुप् छन्दः । छन्दो जगती । जगती छन्दः । छन्दः पृथिवी ।
पृथिवी छन्दः । छन्दोऽन्तरिक्षम् । अन्तरिक्षम् छन्दः । छन्दो द्यौः ।
द्यौ श्छन्दः । छन्दः समाः । समा श्छन्दः । छन्दो नक्षत्राणि ।

नक्षत्राणि छन्दः । छन्दो मनः । मन श्छन्दः । छन्दो वाक् । वाक् छन्दः । छन्दः कृषिः । कृषि श्छन्दः । छन्दो हिरण्यम् । हिरण्यम् छन्दः । छन्दो गौः । गौ श्छन्दः । छन्दोऽजा । अजा छन्दः । छन्दो ऽश्वः । अश्व श्छन्दः । छन्द इति छन्दः ॥ अग्निर् देवता । देवता वातः । **13 (50/54)**

**T.S.4.3.7.2 - Kramam**

वातो देवता । देवता सूर्यः । सूर्यो देवता । देवता चन्द्रमाः । चन्द्रमा देवता । देवता वसवः । वसवो देवता । देवता रुद्राः । रुद्रा देवता । देवताऽऽदित्याः । आदित्या देवता । देवता विश्वे । विश्वे देवाः । देवा देवता । देवता मरुतः । मरुतो देवता । देवता बृहस्पतिः । बृहस्पतिर् देवता । देवतेन्द्रः । इन्द्रो देवता । देवता वरुणः । वरुणो देवता । देवता मूर्द्धा । मूर्द्धाऽसि । असि राट् । राड् ध्रुवा । ध्रुवा ऽसि । असि धरुणा । धरुणा यन्त्री । यन्त्र्यसि । असि यमित्री । यमित्रीषे । इषे त्वा । त्वोर्जे । ऊर्जे त्वा । त्वा कृष्यै । कृष्यै त्वा । त्वा क्षेमाय । क्षेमाय त्वा । त्वा यन्त्री । यन्त्री राट् । राड् ध्रुवा । ध्रुवाऽसि । असि धरणी । धरणी धर्त्री । धर्त्र्यसि । असि धरित्री । धरित्र्यायुषे ( ) ।

आयुषे त्वा । त्वा वर्चसे । वर्चसे त्वा । त्वौजसे । ओजसे त्वा ।
त्वा बलाय । बलाय त्वा । त्वेति त्वा ॥ **14** (**56/56**)

*(देवता – ऽयुषे त्वा – षट्च) (A7)*

**T.S.4.3.8.1 - Kramam**

आशुस्त्रिवृत् । त्रिवृद् भान्तः । त्रिवृदिति त्रि – वृत् ।
भान्तः पञ्चदशः । पञ्चदशो व्योम । पञ्चदश इति पञ्च–दशः ।
व्योम सप्तदशः । व्योमेति वि – ओम । सप्तदशः प्रतूर्तिः ।
सप्तदश इति सप्त–दशः । प्रतूर्तिरष्टादशः । प्रतूर्तिरिति प्र – तूर्तिः ।
अष्टादशस्तपः । अष्टादश इत्यष्टा – दशः । तपो नवदशः ।
नवदशोऽभिवर्तः । नवदश इति नव–दशः । अभिवर्तः सविꣳशः ।
अभिवर्त इत्यभि – वर्तः । सविꣳशो धरुणः । सविꣳश इति
स – विꣳशः । धरुण एकविꣳशः । एकविꣳशो वर्चः । एकविꣳश
इत्येक – विꣳशः । वर्चो द्वाविꣳशः । द्वाविꣳशः सम्भरणः ।
सम्भरणस्त्रयोविꣳशः । सम्भरण इति सम् – भरणः । त्रयोविꣳशो
योनिः । त्रयोविꣳश इति त्रयः – विꣳशः । योनिश्चतुर्विꣳशः ।
चतुर्विꣳशो गर्भाः । चतुर्विꣳश इति चतुः – विꣳशः ।

गर्भाः पञ्चवि॒ꣳ॒शः । प॒ञ्च॒वि॒ꣳ॒श ओजः । प॒ञ्च॒वि॒ꣳ॒श इति

पञ्च - वि॒ꣳ॒शः । ओजस्त्रि॒णवः । त्रि॒णवः क्रतुः । त्रि॒णव इति

त्रि - न॒वः । क्रतुरेकत्रि॒ꣳ॒शः । ए॒क॒त्रि॒ꣳ॒शः प्रति॒ष्ठा । ए॒क॒त्रि॒ꣳ॒श

इत्येक - त्रि॒ꣳ॒शः । प्रति॒ष्ठा त्रयस्त्रि॒ꣳ॒शः । प्रति॒ष्ठेति प्रति - स्था ।

त्र॒य॒स्त्रि॒ꣳ॒शो ब्र॒द्ध्नस्य । त्र॒य॒स्त्रि॒ꣳ॒श इति त्रयः - त्रि॒ꣳ॒शः ।

ब्र॒द्ध्नस्य वि॒ष्टपम् । वि॒ष्टपम् चतुस्त्रि॒ꣳ॒शः । च॒तु॒स्त्रि॒ꣳ॒शो नाकः ।

च॒तु॒स्त्रि॒ꣳ॒श इति चतुः - त्रि॒ꣳ॒शः । नाकः षट्त्रि॒ꣳ॒शः । ष॒ट्त्रि॒ꣳ॒शो

वि॒वर्तः । ष॒ट्त्रि॒ꣳ॒श इति षट् - त्रि॒ꣳ॒शः । वि॒व॒र्तोऽष्टाचत्वारि॒ꣳ॒शः ।

वि॒व॒र्त इति वि - व॒र्तः । अ॒ष्टा॒च॒त्वा॒रि॒ꣳ॒शो ध॒र्त्रः ।

अ॒ष्टा॒च॒त्वा॒रि॒ꣳ॒श इत्यष्टा - च॒त्वा॒रि॒ꣳ॒शः । ध॒र्त्रश्चतुष्टो॒मः ।

च॒तु॒ष्टो॒म इति चतुः - स्तो॒मः ॥ **15** (**37/59**)

*(आ॒शुः स॒प्तत्रि॑ꣳशत्) (A8)*

**T.S.4.3.9.1 - Kramam**

अ॒ग्नेर् भा॒गः । भा॒गोऽसि । अ॒सि दी॒क्षायाः । दी॒क्षाया॒ आधिपत्यम् ।

आधिपत्य॒म् ब्रह्म । आधिपत्य॒मित्याधि - प॒त्य॒म् । ब्रह्म स्पृ॒तम् ।

स्पृतम् त्रिवृत् । त्रिवृथ् स्तोमः । त्रिवृदिति त्रि – वृत् ।
स्तोम इन्द्रस्य । इन्द्रस्य भागः । भागोऽसि । असि विष्णोः ।
विष्णोराधिपत्यम् । आधिपत्यम् क्षत्रम् । आधिपत्यमित्याधि–पत्यम् ।
क्षत्रꣳ स्पृतम् । स्पृतम् पञ्चदशः । पञ्चदशः स्तोमः । पञ्चदश
इति पञ्च – दशः । स्तोमो नृचक्षसाम् । नृचक्षसाम् भागः ।
नृचक्षसामिति नृ – चक्षसाम् । भागोऽसि । असि धातुः ।
धातुराधिपत्यम् । आधिपत्यम् जनित्रम् । आधिपत्यमित्याधि–पत्यम् ।
जनित्रꣳ स्पृतम् । स्पृतꣳ सप्तदशः । सप्तदशः स्तोमः । सप्तदश
इति सप्त – दशः । स्तोमो मित्रस्य । मित्रस्य भागः । भागोऽसि ।
असि वरुणस्य । वरुणस्याधिपत्यम् । आधिपत्यम् दिवः ।
आधिपत्यमित्याधि – पत्यम् । दिवो वृष्टिः । वृष्टिर् वाताः ।
वाताः स्पृताः । स्पृता एकविꣳशः । एकविꣳशः स्तोमः ।
एकविꣳश इत्येक – विꣳशः । स्तोमोऽदित्यै । अदित्यै भागः ।
भागोऽसि । असि पूष्णः । पूष्ण आधिपत्यम् । आधिपत्यमोजः ।
आधिपत्यमित्याधि – पत्यम् । ओजः स्पृतम् । स्पृतम् त्रिणवः ।

त्रिणवः स्तोमः । त्रिणव इति त्रि – नवः । स्तोमो वसूनाम् ।

वसूनाम् भागः । भागोऽसि ( ) । असि रुद्राणाम् । 16 (50/61)

**T.S.4.3.9.2 - Kramam**

रुद्राणामाधिपत्यम् । आधिपत्यम् चतुष्पात् ।

आधिपत्यमित्याधि – पत्यम् । चतुष्पाथ् स्पृतम् । चतुष्पादिति

चतुः – पात् । स्पृतम् चतुर्वि॒ꣳशः । चतुर्वि॒ꣳशः स्तोमः ।

चतुर्वि॒ꣳश इति चतुः – वि॒ꣳशः । स्तोम आदित्यानाम् ।

आदित्यानाम् भागः । भागोऽसि । असि मरुताम् ।

मरुतामाधिपत्यम् । आधिपत्यम् गर्भाः । आधिपत्यमित्याधि–पत्यम् ।

गर्भाः स्पृताः । स्पृताः पञ्चवि॒ꣳशः । पञ्चवि॒ꣳशः स्तोमः ।

पञ्चवि॒ꣳशः इति पञ्च – वि॒ꣳशः । स्तोमो देवस्य ।

देवस्य सवितुः । सवितुर् भागः । भागोऽसि । असि बृहस्पतेः ।

बृहस्पतेराधिपत्यम् । आधिपत्यꣳ समीचीः ।

आधिपत्यमित्याधि – पत्यम् । समीचीर् दिशः । दिशः स्पृताः ।

स्पृताश्चतुष्टोमः । चतुष्टोमः स्तोमः । चतुष्टोम इति चतुः – स्तोमः ।

स्तोमो यावानाम् । यावानाम् भागः । भागोऽसि । अस्ययावानाम् ।

अयावानामाधिपत्यम् । आधिपत्यम् प्रजाः ।

आधिपत्यमित्याधि – पत्यम् । प्रजाः स्पृताः । प्रजा इति प्र – जाः ।

स्पृताश्चतुश्चत्वारि॒ꣳशः । चतुश्चत्वारि॒ꣳशः स्तोमः । चतुश्चत्वारि॒ꣳश

इति चतुः – चत्वारि॒ꣳशः । स्तोम ऋभूणाम् । ऋभूणाम् भागः ।

भागोऽसि । असि विश्वेषाम् । विश्वेषाम् देवानाम् ।

देवानामाधिपत्यम् । आधिपत्यम् भूतम् । आधिपत्यमित्याधि–पत्यम् ।

भूतम् निशान्तम् । निशान्त॒ꣳ स्पृतम् । निशान्तमिति नि – शान्तम् ।

स्पृतम् त्रयस्त्रि॒ꣳशः । त्रयस्त्रि॒ꣳशः स्तोमः । त्रयस्त्रि॒ꣳश

इति त्रयः – त्रि॒ꣳशः । स्तोम इति स्तोमः ॥ **17** (**46/59**)

*(वसूनां भागोऽसि – षट्चत्वारि॒ꣳशच्च) (A9)*

**T.S.4.3.10.1 - Kramam**

एकयाऽस्तुवत । अस्तुवत प्रजाः । प्रजा अधीयन्त । प्रजा इति

प्र – जाः । अधीयन्त प्रजापतिः । प्रजापतिरधिपतिः । प्रजापतिरिति

प्रजा – पतिः । अधिपतिरासीत् । अधिपतिरित्यधि – पतिः ।

आसीत् तिसृभिः । तिसृभिरस्तुवत । तिसृभिरिति तिसृ – भिः ।

अस्तुवत ब्रह्म । ब्रह्मासृज्यत । असृज्यत ब्रह्मणः । ब्रह्मणस्पतिः ।

पतिरधिपतिः । अधिपतिरासीत् । अधिपतिरित्यधि - पतिः । आसीत्
पञ्चभिः । पञ्चभिरस्तुवत । पञ्चभिरिति पञ्च - भिः । अस्तुवत
भूतानि । भूतान्यसृज्यन्त । असृज्यन्त भूतानाम् । भूतानाम् पतिः ।
पतिरधिपतिः । अधिपतिरासीत् । अधिपतिरित्यधि - पतिः ।
आसीथ् सप्तभिः । सप्तभिरस्तुवत । सप्तभिरिति सप्त - भिः ।
अस्तुवत सप्तर्.षयः । सप्तर्.षयोऽसृज्यन्त । सप्तर्.षय इति
सप्त-ऋषयः । असृज्यन्त धाता । धाताऽधिपतिः । अधिपतिरासीत् ।
अधिपतिरित्यधि - पतिः । आसीन् नवभिः । नवभिरस्तुवत ।
नवभिरिति नव - भिः । अस्तुवत पितरः । पितरोऽसृज्यन्त ।
असृज्यन्तादितिः । अदितिरधिपत्नी । अधिपत्न्यासीत् ।
अधिपत्नीत्यधि - पत्नी । आसीदेकादशभिः । एकादशभिरस्तुवत ।
एकादशभिरित्येकादश-भिः । अस्तुवतर्तवः । ऋतवोऽसृज्यन्त ।
असृज्यन्तार्तवः । आर्तवोऽधिपतिः । अधिपतिरासीत् ।
अधिपतिरित्यधि - पतिः । आसीत् त्रयोदशभिः ।
त्रयोदशभिरस्तुवत । त्रयोदशभिरिति त्रयोदश - भिः ।

अस्तुवत मासाः । मासा असृज्यन्त । असृज्यन्त सम्ँवथ्सरः ।

सम्ँवथ्सरोऽधिपतिः । सम्ँवथ्सर इति सं – वथ्सरः ।

अधिपतिरासीत् । अधिपतिरित्यधि – पतिः । **18 (50/67)**

**T.S.4.3.10.2 - Kramam**

आसीत् पञ्चदशभिः । पञ्चदशभिरस्तुवत । पञ्चदशभिरिति

पञ्चदश – भिः । अस्तुवत क्षत्रम् । क्षत्रमसृज्यत । असृज्यतेन्द्रः ।

इन्द्रोऽधिपतिः । अधिपतिरासीत् । अधिपतिरित्यधि – पतिः ।

आसीथ् सप्तदशभिः । सप्तदशभिरस्तुवत । सप्तदशभिरिति

सप्तदश – भिः । अस्तुवत पशवः । पशवोऽसृज्यन्त ।

असृज्यन्त बृहस्पतिः । बृहस्पतिरधिपतिः । अधिपतिरासीत् ।

अधिपतिरित्यधि – पतिः । आसीन् नवदशभिः । नवदशभिरस्तुवत ।

नवदशभिरिति नवदश – भिः । अस्तुवत शूद्रार्यौ ।

शूद्रार्यावसृज्येताम् । शूद्रार्याविति शूद्र–अर्यौ । असृज्येतामहोरात्रे ।

अहोरात्रे अधिपत्नी । अहोरात्रे इत्यहः – रात्रे । अधिपत्नी आस्ताम् ।

अधिपत्नी इत्यधि – पत्नी । आस्तामेकवि॒ꣳशत्या ।

एकवि॒ꣳशत्याऽस्तुवत । एकवि॒ꣳशत्येत्येक – वि॒ꣳशत्या ।

अस्तुवतैकशफाः । एकशफाः पशवः । एकशफा इत्येक – शफाः ।

पशवोऽसृज्यन्त । असृज्यन्त वरुणः । वरुणोऽधिपतिः ।

अधिपतिरासीत् । अधिपतिरित्यधि–पतिः । आसीत् त्रयोविꣳशत्या ।

त्रयोविꣳशत्याऽस्तुवत । त्रयोविꣳशत्येति त्रयः – विꣳशत्या ।

अस्तुवत क्षुद्राः । क्षुद्राः पशवः । पशवोऽसृज्यन्त । असृज्यन्त

पूषा । पूषाऽधिपतिः । अधिपतिरासीत् । अधिपतिरित्यधि – पतिः ।

आसीत् पञ्चविꣳशत्या । पञ्चविꣳशत्याऽस्तुवत । पञ्चविꣳशत्येति

पञ्च – विꣳशत्या । अस्तुवतारण्याः । आरण्याः पशवः ।

पशवोऽसृज्यन्त । असृज्यन्त वायुः । वायुरधिपतिः ।

अधिपतिरासीत् । अधिपतिरित्यधि–पतिः । आसीथ् सप्तविꣳशत्या ।

सप्तविꣳशत्याऽस्तुवत । सप्तविꣳशत्येति सप्त – विꣳशत्या ।

अस्तुवत द्यावापृथिवी । द्यावापृथिवी वि ( ) ।

द्यावापृथिवी इति द्यावा – पृथिवी । व्यैताम् । **19 (50/67)**

**T.S.4.3.10.3 - Kramam**

ऐतां ँवसवः । वसवो रुद्राः । रुद्रा आदित्याः । आदित्या अनु ।

अनु वि । व्यायन्न् । आयन् तेषाम् । तेषामाधिपत्यम् ।

आधिपत्यमासीत् । आधिपत्यमित्याधि – पत्यम् ।

आसीन् नवविꣳशत्या । नवविꣳशत्याऽस्तुवत । नवविꣳशत्येति

नव – विꣳशत्या । अस्तुवत वनस्पतयः । वनस्पतयोऽसृज्यन्त ।

असृज्यन्त सोमः । सोमोऽधिपतिः । अधिपतिरासीत् ।

अधिपतिरत्यधि – पतिः । आसीदेकत्रिꣳशताः । एकत्रिꣳशता

ऽस्तुवत । एकत्रिꣳशतेत्येक – त्रिꣳशता । अस्तुवत प्रजाः ।

प्रजा असृज्यन्त । प्रजा इति प्र – जाः । असृज्यन्त यावानाम् ।

यावानाम् च । चायावानाम् । अयावानाम् च । चाधिपत्यम् ।

आधिपत्यमासीत् । आधिपत्यमित्याधि – पत्यम् । आसीत्

त्रयस्त्रिꣳशता । त्रयस्त्रिꣳशताऽस्तुवत । त्रयस्त्रिꣳशतेति

त्रयः – त्रिꣳशता । अस्तुवत भूतानि । भूतान्यशाम्यन्न् । अशाम्यन्

प्रजापतिः । प्रजापतिः परमेष्ठी । प्रजापतिरिति प्रजा – पतिः ।

परमेष्ठ्यधिपतिः । अधिपतिरासीत् । अधिपतिरित्यधि – पतिः ।

आसीदित्यासीत् ॥ **20** (**35/44**)

*(सँवथ्सरोऽधिपति – र्वि – पञ्चत्रिꣳशच्च) (A10)*

## T.S.4.3.11.1 - Kramam

इयमेव । एव सा । सा या । या प्रथमा । प्रथमा व्यौच्छत् ।

व्यौच्छदन्तः । व्यौच्छदिति वि – औच्छत् । अन्तरस्याम् । अस्याम्

चरति । चरति प्रविष्टा । प्रविष्टेति प्र – विष्टा ॥ वधूर् जजान ।

जजान नवगत् । नवगज् जनित्री । नवगदिति नव – गत् ।

जनित्री त्रयः । त्रय एनाम् । एनाम् महिमानः । महिमानः सचन्ते ।

सचन्त इति सचन्ते ॥ छन्दस्वती उषसा । छन्दस्वती इति छन्दस्वती ।

उषसा पेपिशाने । पेपिशाने समानम् । पेपिशाने इति पेपिशाने ।

समानं ँयोनिम् । योनिमनु । अनु सञ्चरन्ती । सञ्चरन्ती इति

सम् – चरन्ती ॥ सूर्यपत्नी वि । सूर्यपत्नी इति सूर्य – पत्नी ।

वि चरतः । चरतः प्रजानती । प्रजानती केतुम् । प्रजानती इति

प्र – जानती । केतुम् कृण्वाने । कृण्वाने अजरे । कृण्वाने इति

कृण्वाने । अजरे भूरिरेतसा । अजरे इत्यजरे । भूरिरेतसेति

भूरि – रेतसा ॥ ऋतस्य पन्थाम् । पन्था मनु । अनु तिस्रः ।

तिस्र आ । आऽगुः । अगुस्त्रयः । त्रयो घर्मासः । घर्मासो अनु ।

अनु ज्योतिषा । ज्योतिषा । आऽगुः । अगुरित्यगुः ॥ प्रजामेका ।
प्रजामिति प्र – जाम् । एका रक्षति । रक्षत्यूर्जम् । ऊर्जमेका ।
एका व्रतम् । **21 (50/59)**

**T.S.4.3.11.2 - Kramam**

व्रतमेका । एका रक्षति । रक्षति देवयूनाम् । देवयूनामिति
देव – यूनाम् ॥ चतुष्टोमो अभवत् । चतुष्टोम इति चतुः – स्तोमः ।
अभवद् या । या तुरीया । तुरीया यज्ञस्य । यज्ञस्य पक्षौ ।
पक्षावृषयः । ऋषयो भवन्ती । भवन्तीति भवन्ती ॥ गायत्रीम् त्रिष्टुभम् ।
त्रिष्टुभम् जगतीम् । जगतीमनुष्टुभम् । अनुष्टुभम् बृहत् ।
अनुष्टुभमित्यनु – स्तुभम् । बृहदर्कम् । अर्कँ युञ्जानाः । युञ्जानाः
सुवः । सुवरा । आऽभरन्न् । अभरन्निदम् । इदमितीदम् ॥ पञ्चभिर्
धाता । पञ्चभिरिति पञ्च – भिः । धाता वि । वि दधौ । दधाविदम् ।
इदँ यत् । यत् तासाम् । तासा॰ स्वसॄः । स्वसॄरजनयत् । अजनयत्
पञ्चपञ्च । पञ्चपञ्चेति पञ्च – पञ्च ॥ तासामु । उ यन्ति ।
यन्ति प्रयवेण । प्रयवेण पञ्च । प्रयवेणेति प्र – यवेन । पञ्च नाना ।
नाना रूपाणि । रूपाणि क्रतवः । क्रतवो वसानाः ।

वसाना इति वसानाः ॥ त्रिꣳशथ् स्वसारः । स्वसार उप । उप यन्ति ।
यन्ति निष्कृतम् । निष्कृतꣳ समानम् । निष्कृतमिति निः – कृतम् ।
समानम् केतुम् । केतुम् प्रतिमुञ्चमानाः । प्रतिमुञ्चमाना इति
प्रति – मुञ्चमानाः ॥ **22** (**50/55**)

**T.S.4.3.11.3 - Kramam**

ऋतूꣳ स्तन्वते । तन्वते कवयः । कवयः प्रजानतीः । प्रजानतीर्
मद्ध्येछन्दसः । प्रजानतीरिति प्र – जानतीः । मद्ध्येछन्दसः परि ।
मद्ध्येछन्दस इति मद्ध्ये–छन्दसः । परि यन्ति । यन्ति भास्वतीः ।
भास्वतीरिति भास्वतीः ॥ ज्योतिष्मती प्रति । प्रति मुञ्चते । मुञ्चते
नभः । नभो रात्री । रात्री देवी । देवी सूर्यस्य । सूर्यस्य व्रतानि ।
व्रतानीति व्रतानि ॥ वि पश्यन्ति । पश्यन्ति पशवः । पशवो
जायमानाः । जायमाना नानारूपाः । नानारूपा मातुः । नानारूपा इति
नाना – रूपाः । मातुरस्याः । अस्या उपस्थे । उपस्थ इत्युप–स्थे ॥
एकाष्टका तपसा । एकाष्टकेत्येक – अष्टका । तपसा तप्यमाना ।
तप्यमाना जजान । जजान गर्भम् । गर्भम् महिमानम् ।
महिमानमिन्द्रम् । इन्द्रमितीन्द्रम् ॥ तेन दस्यून् । दस्यून्. वि ।

व्यसहन्त । असहन्त देवाः । देवा हन्ता । हन्ताऽसुराणाम् ।
असुराणामभवत् । अभवच्छचीभिः । शचीभिरिति शचि – भिः ॥
अनानुजामनुजाम् । अनानुजामित्यनानु – जाम् । अनुजाम् माम् ।
अनुजामित्यनु – जाम् । मामकर्त । अकर्त सत्यम् । सत्यं ँवदन्ती ।
वदन्त्यनु । अन्विच्छे । इच्छ एतत् । एतदित्येतत् ॥
भूयासमस्य । **23 (50/56)**

**T.S.4.3.11.4 - Kramam**

अस्य सुमतौ । सुमतौ यथा । सुमताविति सु – मतौ । यथा यूयम् ।
यूयमन्या । अन्या वः । वो अन्याम् । अन्यामति । अति मा । मा प्र ।
प्र युक्त । युक्तेति युक्त ॥ अभून् मम । मम सुमतौ । सुमतौ
विश्ववेदाः । सुमताविति सु – मतौ । विश्ववेदा आष्ट । विश्ववेदा
इति विश्व – वेदाः । आष्ट प्रतिष्ठाम् । प्रतिष्ठामविदत् । प्रतिष्ठामिति
प्रति – स्थाम् । अविदद्धि । हि गाधम् । गाधमिति गाधम् ॥
भूयासमस्य । अस्य सुमतौ । सुमतौ यथा । सुमताविति सु–मतौ ।
यथा यूयम् । यूयमन्या । अन्या वः । वो अन्याम् । अन्यामति ।
अति मा । मा प्र । प्र युक्त । युक्तेति युक्त ॥ पञ्च व्युष्टीः । व्युष्टीरनु ।

व्युष्टीरिति वि – उष्टीः । अनु पञ्च । पञ्च दोहाः । दोहा गाम् । गाम् पञ्चनाम्नीम् । पञ्चनाम्नीमृतवः । पञ्चनाम्नीमिति पञ्च – नाम्नीम् । ऋतवोऽनु । अनु पञ्च । पञ्चेति पञ्च ॥ पञ्च दिशः । दिशः पञ्चदशेन । पञ्चदशेन क्लृप्ताः । पञ्चदशेनेति पञ्च – दशेन । क्लृप्ताः समानमूर्द्ध्नीः । समानमूर्द्ध्नीरभि । समानमूर्द्ध्नीरिति समान–मूर्द्ध्नीः । अभि लोकम् । लोकमेकम् । एकमित्येकम् ॥ **24 (50/59)**

**T.S.4.3.11.5 - Kramam**

ऋतस्य गर्भः । गर्भः प्रथमा । प्रथमा व्यूषुषी । व्यूषुष्यपाम् । व्यूषुषीति वि – ऊषुषी । अपामेका । एका महिमानम् । महिमानम् बिभर्ति । बिभर्तीति बिभर्ति ॥ सूर्यस्यैका । एका चरति । चरति निष्कृतेषु । निष्कृतेषु घर्मस्य । निष्कृतेष्विति निः – कृतेषु । घर्मस्यैका । एका सविता । सवितैकाम् । एकाम् नि । नि यच्छति । यच्छतीति यच्छति ॥ या प्रथमा । प्रथमा व्यौच्छत् । व्यौच्छथ् सा । व्यौच्छदिति वि – औच्छत् । सा धेनुः । धेनुरभवत् । अभवद् यमे । यम इति यमे ॥ सा नः । नः पयस्वती ।

पयस्वती धुक्ष्व । धुक्ष्वोत्तरामुत्तराम् । उत्तरामुत्तरा॒ꣳ समाम् । उत्तरामुत्तरामित्युत्तराम् – उत्तराम् । समामिति समाम् ॥ शुक्रर्.षभा नभसा । शुक्रर्.षभेति शुक्र–ऋषभा । नभसा ज्योतिषा । ज्योतिषा । आऽगात् । अगाद् विश्वरूपा । विश्वरूपा शबलीः । विश्वरूपेति विश्व – रूपा । शबलीरग्निकेतुः । अग्निकेतुरित्यग्नि – केतुः ॥ समानमर्थम् । अर्थꣳ स्वपस्यमाना । स्वपस्यमाना बिभ्रती । स्वपस्यमानेति सु – अपस्यमाना । बिभ्रती जराम् । जरामजरे । अजर उषः । उष आ । आऽगाः । अगा इत्यगाः ॥ ऋतूनाम् पत्नी ( ) । पत्नी प्रथमा । प्रथमेयम् । इयमा । आऽगात् । अगादह्नाम् । अह्नाम् नेत्री । नेत्री जनित्री । जनित्री प्रजानाम् । प्रजानामिति प्र–जानाम् ॥ एका सती । सती बहुधा । बहुधोषः । बहुधेति बहु–धा । उषो वि । व्युच्छसि । उच्छस्यजीर्णा । अजीर्णा त्वम् । त्वम् जरयसि । जरयसि सर्वम् । सर्वमन्यत् । अन्यदित्यन्यत् ॥ **25**

**(69/77)** *(ऊर्जमेका – प्रतिमुञ्चमाना – भूयास – मेकं – पत्न्ये कान्न विꣳशतिश्च) (A11)*

**T.S.4.3.12.1 - Kramam**

अग्ने जातान् । जातान् प्र । प्र णुद । नुदा नः । नः सपत्नान् ।
सपत्नान् प्रति । प्रत्यजातान् । अजातान् जातवेदः । जातवेदो नुदस्व ।
जातवेद इति जात - वेदः । नुदस्वेति नुदस्व ॥ अस्मे दीदिहि ।
अस्मे इत्यस्मे । दीदिहि सुमनाः । सुमना अहेडन्न् । सुमना इति
सु - मनाः । अहेडन् तव । तव स्याम् । स्याꣳ शर्मन्न् ।
शर्मन् त्रिवरूथः । त्रिवरूथ उद्भित् । त्रिवरूथ इति त्रि - वरूथः ।
उद्भिदित्युत् - भित् ॥ सहसा जातान् । जातान् प्र । प्र णुद ।
नुदा नः । नः सपत्नान् । सपत्नान् प्रति । प्रत्यजातान् । अजातान्
जातवेदः । जातवेदो नुदस्व । जातवेद इति जात - वेदः ।
नुदस्वेति नुदस्व ॥ अधि नः । नो ब्रूहि । ब्रूहि सुमनस्यमानः ।
सुमनस्यमानो वयम् । सुमनस्यमान इति सु - मनस्यमानः ।
वयꣳ स्याम । स्याम प्र । प्र णुद । नुदा नः । नः सपत्नान् ।
सपत्नानिति सपत्नान् ॥ चतुश्चत्वारिꣳशः स्तोमः । चतुश्चत्वारिꣳश
इति चतुः - चत्वारिꣳशः । स्तोमो वर्चः । वर्चो द्रविणम् ।
द्रविणꣳ षोडशः । षोडशः स्तोमः । स्तोम ओजः ।

ओजो द्रविणम् । द्रविणम् पृथिव्याः । पृथिव्याः पुरीषम् ।

पुरीषमसि । अस्यफ्सः । **26 (50/57)**

**T.S.4.3.12.2 - Kramam**

अफ्सो नाम । नामेति नाम ॥ एव श्छन्दः । छन्दो वरिवः ।

वरिव श्छन्दः । छन्दः शम्भूः । शम्भू श्छन्दः । शम्भूरिति

शम् – भूः । छन्दः परिभूः । परिभू श्छन्दः । परिभूरिति परि–भूः ।

छन्द आच्छत् । आच्छच्छन्दः । छन्दो मनः । मन श्छन्दः ।

छन्दो व्यचः । व्यच श्छन्दः । छन्दः सिन्धुः । सिन्धु श्छन्दः ।

छन्दः समुद्रम् । समुद्रम् छन्दः । छन्दः सलिलम् । सलिलम्

छन्दः । छन्दः सम्ँयत् । सम्ँयच्छन्दः । सम्ँयदिति सम् – यत् ।

छन्दो वियत् । वियच्छन्दः । वियदिति वि – यत् । छन्दो बृहत् ।

बृहच्छन्दः । छन्दो रथन्तरम् । रथन्तरम् छन्दः । रथन्तरमिति

रथम् – तरम् । छन्दो निकायः । निकाय श्छन्दः । निकाय इति

नि – कायः । छन्दो विवधः । विवध श्छन्दः । विवध इति

वि – वधः । छन्दो गिरः । गिर श्छन्दः । छन्दो भ्रजः ।

भ्रज श्छन्दः । छन्दः सष्टुप् । सष्टुप् छन्दः । सष्टुबिति स – स्तुप् ।
छन्दोऽनुष्टुप् । अनुष्टुप् छन्दः । अनुष्टुबित्यनु–स्तुप् । छन्दः ककुत् ।
ककुच्छन्दः । छन्दस्त्रिककुत् । त्रिककुच्छन्दः । त्रिककुदिति
त्रि – ककुत् । छन्दः काव्यम् । काव्यम् छन्दः । छन्दोऽङ्कुपम् ।
अङ्कुपम् छन्दः ( ) । छन्दः पदपङ्क्तिः । **27 (50/60)**

**T.S.4.3.12.3 - Kramam**

पदपङ्क्ति श्छन्दः । पदपङ्क्तिरिति पद – पङ्क्तिः ।
छन्दोऽक्षरपङ्क्तिः । अक्षरपङ्क्ति श्छन्दः ।
अक्षरपङ्क्तिरित्यक्षर – पङ्क्तिः । छन्दो विष्टारपङ्क्तिः ।
विष्टारपङ्क्ति श्छन्दः । विष्टारपङ्क्तिरिति विष्टार – पङ्क्तिः ।
छन्दः क्षुरः । क्षुरो भृज्वान् । भृज्वान् छन्दः । छन्दः प्रच्छत् ।
प्रच्छच्छन्दः । छन्दः पक्षः । पक्ष श्छन्दः । छन्द एवः । एव श्छन्दः ।
छन्दो वरिवः । वरिव श्छन्दः । छन्दो वयः । वय श्छन्दः ।
छन्दो वयस्कृत् । वयस्कृच्छन्दः । वयस्कृदिति वयः – कृत् ।
छन्दो विशालम् । विशालम् छन्दः । विशालमिति वि – शालम् ।
छन्दो विष्पर्द्धाः । विष्पर्द्धा श्छन्दः । विष्पर्द्धा इति वि – स्पर्द्धाः ।

छन्द श्छदिः । छदि श्छन्दः । छन्दो दूरोहणम् । दूरोहणम् छन्दः ।
दूरोहणमिति दुः - रोहणम् । छन्दस्तन्द्रम् । तन्द्रम् छन्दः ।
छन्दोऽङ्काङ्कम् । अङ्काङ्कम् छन्दः ।
छन्द इति छन्दः ॥ **28** (**33/40**)

*(अस्य - ङ्क्रुपञ्छन्द - स्त्रयस्त्रिꣳशच्च) (A12)*

**T.S.4.3.13.1 - Kramam**

अग्निर् वृत्राणि । वृत्राणि जङ्घनत् । जङ्घनद् द्रविणस्युः ।
द्रविणस्युर् विपन्यया । विपन्ययेति वि - पन्यया ॥ समिद्धः शुक्रः ।
समिद्ध इति सम् - इद्धः । शुक्र आहुतः । आहुत इत्या - हुतः ॥
त्वꣳ सोम । सोमासि । असि सत्पतिः । सत्पतिस्त्वम् ।
सत्पतिरिति सत् - पतिः । त्वꣳ राजा । राजोत । उत वृत्रहा ।
वृत्रहेति वृत्र - हा ॥ त्वम् भद्रः । भद्रो असि । असि क्रतुः ।
क्रतुरिति क्रतुः ॥ भद्रा ते । ते अग्ने । अग्ने स्वनीक । स्वनीक
सन्दृक् । स्वनीकेति सु - अनीक । सन्दृग् घोरस्य । सन्दृगिति
सम् - दृक् । घोरस्य सतः । सतो विषुणस्य । विषुणस्य चारुः ।
चारुरिति चारुः ॥ न यत् । यत् ते । ते शोचिः । शोचिस्तमसा ।

तमसा वरन्त । वरन्त न । न ध्वस्मानः । ध्वस्मानस्तनुवि ।

तनुवि रेपः । रेप आ । आ धुः । धुरिति धुः ॥ भद्रम् ते । ते अग्ने ।

अग्ने सहस्विन् । सहस्विन्ननीकम् । अनीकमुपाके । उपाक आ ।

आ रोचते । रोचते सूर्यस्य । सूर्यस्येति सूर्यस्य ॥ **29** (**50/54**)

**T.S.4.3.13.2 - Kramam**

रुशद् दृशे । दृशे ददृशे । ददृशे नक्तया । नक्तया चित् ।

चिदरूक्षितम् । अरूक्षितम् दृशे । दृश आ । आ रूपे । रूपे अन्नम् ।

अन्नमित्यन्नम् ॥ सैना । एनाऽनीकेन । अनीकेन सुविदत्रः । सुविदत्रो

अस्मे । सुविदत्र इति सु – विदत्रः । अस्मे यष्टा । अस्मे इत्यस्मे ।

यष्टा देवान् । देवा॒ँ आयजिष्ठः । आयजिष्ठः स्वस्ति । आयजिष्ठ

इत्या – यजिष्ठः । स्वस्तीति स्वस्ति ॥ अदब्धो गोपाः । गोपा उत ।

गोपा इति गो – पाः । उत नः । नः परस्पाः । परस्पा अग्ने ।

परस्पा इति परः – पाः । अग्ने द्युमत् । द्युमदुत । द्युमदिति

द्यु – मत् । उत रेवत् । रेवद् दिदीहि । दिदीहीति दिदीहि ॥

स्वस्ति नः । नो दिवः । दिवो अग्ने । अग्ने पृथिव्याः ।

पृथिव्या विश्वायुः । विश्वायुर् धेहि । विश्वायुरिति विश्व – आयुः ।

धेहि यजथाय । यजथाय देव । देवेति देव ॥ यथ् सीमहि । सीमहि दिविजात । दिविजात प्रशस्तम् । दिविजातेति दिवि – जात । प्रशस्तम् तत् । प्रशस्तमिति प्र – शस्तम् । तदस्मासु । अस्मासु द्रविणम् । द्रविणम् धेहि । धेहि चित्रम् । चित्रमिति चित्रम् ॥ यथा होतः । होतर् मनुषः । मनुषो देवताता ॥ **30** (**50/59**)

**<u>T.S.4.3.13.3 - Kramam</u>**

देवताता यज्ञेभिः । देवतातेति देव – ताता । यज्ञेभिः सूनो । सूनो सहसः । सूनो इति सूनो । सहसो यजासि । यजासीति यजासि ॥ एवा नः । नो अद्य । अद्य समना । समना समानान् । समानानुशन्न् । उशन्नग्ने । अग्न उशतः । उशतो यक्षि । यक्षि देवान् । देवानिति देवान् ॥ अग्निमीडे । ईडे पुरोहितम् । पुरोहितं ँयज्ञस्य । पुरोहितमिति पुरः – हितम् । यज्ञस्य देवम् । देवमृत्विजम् । ऋत्विजमित्यृत्विजम् ॥ होतार७ँ रत्नधातमम् । रत्नधातममिति रत्न – धातमम् ॥ वृषा सोम । सोम द्युमान् । द्युमा७ँ असि । द्युमानिति द्यु – मान् । असि वृषा । वृषा देव । देव वृषव्रतः ।

वृषव्रत इति वृष - व्रतः ॥ वृषा धर्माणि । धर्माणि दधिषे । दधिष इति दधिषे ॥ सान्तपना इदम् । सान्तपना इति साम् - तपनाः । इद॒ँ हविः । हविर् मरुतः । मरुतस्तत् । तज् जुजुष्टन । जुजुष्टनेति जुजुष्टन ॥ युष्माकोती । ऊती रिशादसः । रिशादस इति रिश - अदसः ॥ यो नः । नो मर्तः । मर्तो वसवः । वसवो दुर्.हृणायुः । दुर्.हृणायुस्तिरः । दुर्.हृणायुरिति दुः - हृणायुः । तिरः सत्यानि । सत्यानि मरुतः । मरुतो जिघा॒ँसात् ॥ 31 (50/56)

**T.S.4.3.13.4 - Kramam**

जिघा॒ँसादिति जिघा॒ँसात् ॥ द्रुहः पाशम् । पाशम् प्रति । प्रति सः । स मुचीष्ट । मुचीष्ट तपिष्ठेन । तपिष्ठेन तपसा । तपसा हन्तन । हन्तना तम् । तमिति तम् ॥ सम्ँवथ्सरीणा मरुतः । सम्ँवथ्सरीणा इति सम् - वथ्सरीणाः । मरुतः स्वर्काः । स्वर्का उरुक्षयाः । स्वर्का इति सु - अर्काः । उरुक्षयाः सगणाः । उरुक्षया इत्युरु - क्षयाः । सगणा मानुषेषु । सगणा इति स - गणाः । मानुषेष्विति मानुषेषु ॥ तेऽस्मत् । अस्मत् पाशान् । पाशान् प्र । प्र मुञ्चन्तु । मुञ्चन्त्व॒ँहसः । अ॒ँहसः सान्तपनाः ।

सान्तपना मदिराः । सान्तपना इति साम् - तपनाः । मदिरा
मादयिष्णवः । मादयिष्णव इति मादयिष्णवः ॥ पिप्रीहि देवान् ।
देवाꣳ उशतः । उशतो यविष्ठ । यविष्ठ विद्वान् । विद्वाꣳ ऋतून् ।
ऋतूꣳर्. ऋतुपते । ऋतुपते यज । ऋतुपत इत्यृतु - पते । यजेह ।
इहेतीह ॥ ये दैव्याः । दैव्या ऋत्विजः । ऋत्विजस्तेभिः । तेभिरग्ने ।
अग्ने त्वम् । त्वꣳ होतॄणाम् । होतॄणामसि । अस्यायजिष्ठः ।
आयजिष्ठ इत्या - यजिष्ठः ॥ अग्ने यत् । यदद्य । अद्य विशः ।
विशो अद्ध्वरस्य । अद्ध्वरस्य होतः । होतः पावक ।
पावक शोचे ॥ **32** (**50/56**)

**T.S.4.3.13.5 - Kramam**

शोचे वेः । वेष्ट्वम् । त्वꣳ हि । हि यज्वा । यज्वेति यज्वा ॥
ऋता यजासि । यजासि महिना । महिना वि । वि यत् । यद् भूः ।
भूर्. हव्या । हव्या वह । वह यविष्ठ । यविष्ठ या । या ते । ते अद्य ।
अद्येत्यद्य ॥ अग्निना रयिम् । रयिमश्ञवत् । अश्ञवत् पोषम् ।
पोषमेव । एव दिवेदिवे । दिवेदिव इति दिवे - दिवे ॥
यशसम् ँवीरवत्तमम् । वीरवत्तममिति वीरवत् - तमम् ॥

गयस्फानो अमीवहा । गयस्फान इति गय – स्फानः । अमीवहा वसुवित् । अमीवहेत्यमीव – हा । वसुवित् पुष्टिवर्द्धनः । वसुविदिति वसु – वित् । पुष्टिवर्द्धन इति पुष्टि – वर्द्धनः ॥ सुमित्रः सोम । सुमित्र इति सु – मित्रः । सोम नः । नो भव । भवेति भव ॥ गृहमेधास आ । गृहमेधास इति गृह – मेधासः । आ गत । गत मरुतः । मरुतो मा । माऽप । अप भूतन । भूतनेति भूतन ॥ प्रमुञ्चन्तो नः । प्रमुञ्चत इति प्र – मुञ्चन्तः । नो अꣳहसः । अꣳहस इत्यꣳहसः ॥ पूर्वीभिर्. हि । हि ददाशिम । ददाशिम शरद्भिः । शरद्भिर् मरुतः । शरद्भिरिति शरत् – भिः । मरुतो वयम् । वयमिति वयम् ॥ महोभिश्चर्.षणीनाम् । महोभिरिति महः – भिः ॥ **33 (50/58)**

**<u>T.S.4.3.13.6 - Kramam</u>**

चर्.षणीनामिति चर्.षणीनाम् ॥ प्र बुध्निया । बुध्निया ईरते । ईरते वः । वो महाꣳसि । महाꣳसि प्र । प्र णामानि । नामानि प्रयज्यवः । प्रयज्यवस्तिरद्ध्वम् । प्रयज्यव इति प्र – यज्यवः । तिरद्ध्वमिति तिरद्ध्वम् ॥ सहस्रियम् दम्यम् । दम्यम् भागम् ।

भागमेतम् । एतम् गृहमेधीयम् । गृहमेधीयम् मरुतः । गृहमेधीयमिति गृह – मेधीयम् । मरुतो जुषद्ध्वम् । जुषद्ध्वमिति जुषध्वम् ॥ उप यम् । यमेति । एति युवतिः । युवतिः सुदक्षम् । सुदक्षम् दोषा । सुदक्षमिति सु – दक्षम् । दोषा वस्तोः । वस्तोर्. हविष्मती । हविष्मती घृताची । घृताचीति घृताची ॥ उप स्वा । स्वैनम् । एनमरमतिः । अरमतिर् वसूयुः । वसूयुरिति वसु–युः ॥ इमो अग्ने । इमो इतीमो । अग्ने वीततमानि । वीततमानि हव्या । वीततमानीति वीत – तमानि । हव्याऽजस्रः । अजस्रो वक्षि । वक्षि देवतातिम् । देवतातिमच्छ । देवतातिमिति देव – तातिम् । अच्छेत्यच्छ ॥ प्रति नः । न ईम् । ई॒ सुरभीणि । सुरभीणि वियन्तु । वियन्त्विति वियन्तु ॥ क्रीडं वः । वः शर्द्धः । शर्द्धो मारुतम् । मारुतमनर्वाणम् । अनर्वाण॒ रथेशुभम् । रथेशुभमिति रथे – शुभम् ॥ **34 (50/56)**

**T.S.4.3.13.7 - Kramam**

कण्वा अभि । अभि प्र । प्र गायत । गायतेति गायत ॥ अत्यासो न । न ये । ये मरुतः । मरुतः स्वञ्चः । स्वञ्चो यक्षदृशः । यक्षदृशो न । यक्षदृश इति यक्ष – दृशः । न शुभयन्त ।

शुभयन्त मर्याः । मर्या इति मर्याः ॥ ते हर्म्येष्ठाः । हर्म्येष्ठाः

शिशवः । हर्म्येष्ठा इति हर्म्ये – स्थाः । शिशवो न । न शुभ्राः ।

शुभ्रा वथ्सासः । वथ्सासो न । न प्रक्रीडिनः । प्रक्रीडिनः पयोधाः ।

प्रक्रीडिन इति प्र – क्रीडिनः । पयोधा इति पयः – धाः ॥ प्रैषाम् ।

एषामज्मेषु । अज्मेषु विथुरा । विथुरेव । इव रेजते । रेजते भूमिः ।

भूमिर् यामेषु । यामेषु यत् । यद्ध । ह युञ्जते । युञ्जते शुभे ।

शुभ इति शुभे ॥ ते क्रीडयः । क्रीडयो धुनयः । धुनयो

भ्राजदृष्टयः । भ्राजदृष्टयः स्वयम् । भ्राजदृष्टय इति भ्राजत्–ऋष्टयः ।

स्वयम् महित्वम् । महित्वम् पनयन्त । महित्वमिति महि – त्वम् ।

पनयन्त धूतयः । धूतय इति धूतयः ॥ उपह्वरेषु यत् ।

उपह्वरेष्वित्युप – ह्वरेषु । यदचिद्ध्वम् । अचिद्ध्वं ँययिम् ।

ययिं ँवयः । वय इव । इव मरुतः । मरुतः केन ( ) ।

केन चित् । **35 (50/56)**

**T.S.4.3.13.8 - Kramam**

चित् पथा । पथेति पथा ॥ श्चोतन्ति कोशाः । कोशा उप ।
उप वः । वो रथेषु । रथेष्वा । आ घृतम् । घृतमुक्षत ।
उक्षता मधुवर्णम् । मधुवर्णमर्चते । मधुवर्णमिति मधु - वर्णम् ।
अर्चत इत्यर्चते ॥ अग्निमग्निꣳ हवीमभिः ।
अग्निमग्निमित्यग्निम् - अग्निम् । हवीमभिः सदा । हवीमभिरिति
हवीम - भिः । सदा हवन्त । हवन्त विश्पतिम् । विश्पतिमिति
विश्पतिम् ॥ हव्यवाहम् पुरुप्रियम् । हव्यवाहमिति हव्य - वाहम् ।
पुरुप्रियमिति पुरु-प्रियम् ॥ तꣳ हि । हि शश्वन्तः । शश्वन्त ईडते ।
ईडते स्रुचा । स्रुचा देवम् । देवम् घृतश्चुता । घृतश्चुतेति घृत-श्चुता ॥
अग्निꣳ हव्याय । हव्याय वोढवे । वोढव इति वोढवे ॥ इन्द्राग्नी
रोचना । इन्द्राग्नी इतीन्द्र - अग्नी । रोचना दिवः । दिवः श्ञथत् ।
श्ञथद् वृत्रम् । वृत्रमिन्द्रम् । इन्द्रं ँ वः । वो विश्वतः । विश्वतस्परि ।
परीन्द्रम् । इन्द्रं नरः । नरो विश्वकर्मन्न् । विश्वकर्मन्. हविषा ।
विश्वकर्मन्निति विश्व - कर्मन्न् । हविषा वावृधानः ।

वावृधानो विश्वकर्मन्न् । विश्वकर्मन्. हविषा ।

विश्वकर्मन्निति विश्व – कर्मन्न् । हविषा वर्द्धनेन ।

वर्द्धनेनेति वर्द्धनेन ॥ **36** (**46/53**)

***(सूर्यस्य – मनुषो – मरुतः – पावक – महोभी – रथेशुभ – ङ्क्षेन – षट्चत्वारिꣳशच्च) (A13)***

===============

**Prasna Korvai with starting Padams of 1 to 13 Anuvaakams :-**

(अपान्त्वेम – न्नयं पुरो भुवः – प्राची – ध्रुवक्षिति – स्त्र्यवि – रिन्द्राग्नी – मा छन्द – आशुस्त्रिवृ – दग्नेर्भागो – ऽस्येक – येयमेव सा या – ऽग्ने जाता – नग्निर्वृत्राणि – त्रयोदश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अपान्त्वे – न्द्राग्नी – इयमेव – देवताता – षट्त्रिꣳशत् )

**First and Last Padam of Third Prasnam of Kandam 4 :-**

(अपान्त्वेमन् – हविषा वर्धनेन)

॥ हरिः ओं ॥

॥ इति चतुर्थ काण्डे तृतीयः प्रश्नः – क्रम पाठः समाप्तः ॥

============================

**Details of Panchati, Padam and Krama Vaakyam - Kandam 4 Prasanam 3 - TS 4.3**

| | Panchati | Padams | Krama Vaakyams |
|---|---|---|---|
| Anuvakam 1 | 1 | 65 | 67 |
| Anuvakam 2 | 3 | 130 | 170 |
| Anuvakam 3 | 2 | 128 | 156 |
| Anuvakam 4 | 3 | 167 | 209 |
| Anuvakam 5 | 1 | 76 | 92 |
| Anuvakam 6 | 2 | 106 | 123 |
| Anuvakam 7 | 2 | 106 | 110 |
| Anuvakam 8 | 1 | 37 | 59 |
| Anuvakam 9 | 2 | 96 | 120 |
| Anuvakam 10 | 3 | 135 | 178 |
| Anuvakam 11 | 5 | 269 | 306 |
| Anuvakam 12 | 3 | 133 | 157 |
| Anuvakam 13 | 8 | 396 | 448 |
| Total → | 36 | 1844 | 2195 |